6-5 Internal Quality Assurance System

6-5-1 Internal Quality Assurance Cell (IQAC) has contributed significantly for institutionalizing the quality assurance strategies and processes, by constantly reviewing the teaching&learning process, structures & methodologies of operations and learning outcomes, at periodic intervals

**आन्तरिकगुणवत्ताश्वासनकेन्द्रम् अध्यापनाधिगमप्रक्रियायाः , क्रियान्वयनस्य संरचनायाः कार्यपद्धतेश्च, अधिगमपरिणामानां च नियतान्तराले पुनरीक्षणेन गुणवत्ताश्वासनव्यूहानां तत्प्रक्रियाणां च संस्थागतं रूपं प्रदातुम् उल्लेखनीयम् अवदानम् अकरोत्।**

Answerः

संस्थायाः आन्तरिकगुणवत्ताश्वासनकेन्द्रं संस्थायाः शैक्षिकस्तराभिवृद्धये स्तरपरिरक्षणाय च कार्यं कुरुते। गुणवत्तापूर्णा नीतिः एव अस्य केन्द्रस्य द्योतकम् विद्यते। नीतेः अनुप्रयोगाय विश्वविद्यालयस्य प्रत्येकस्मिन् अपि अङ्गाय केन्द्रमिदं मार्गदर्शनं करोति। संस्थानीकरणेन उच्चशिक्षासंस्थायाम् अर्थात् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये गुणात्मकसंस्कृतेः विकासः जायते इति आन्तरिकगुणवत्ताश्वासनकेन्द्रं विभावयति। आभ्यन्तरैः बाह्यैः च सहयोगैः विश्वविद्यालयस्य सर्वाङ्गीणविकासं सम्पादयितुम् असौ प्रयतते। अभिवृद्धेः विकासस्य च मितयः काः काः सन्ति इति सर्वदा केन्द्रम् इदं चिन्तनं करोति। अधिगन्तुः केन्द्रितं शैक्षिकं वातावरणं निर्मातुं तदर्थम् अपेक्षितानां परिपक्वदशासम्पन्नानां शिक्षकाणां च सज्जीकर्तुं केन्द्रमिदं चेष्टते।स्वस्य गुणवत्तापरस्य कार्यस्य सम्पादनाय सांस्थानिकैः संस्थान्तरस्थैः सह परिचर्चाम् अपि इदं करोति।

**गुणाः पूजास्थानम् इत्युक्तिः प्रसिद्धा एव** । एतदनु संस्कृतशिक्षणस्य प्रत्येकस्मिन् अपि पक्षे विद्यमानान् गुणान् आकलयितुम् आवर्धयितुं च आश्वासनं ददाति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रम् । शिक्षणाधिगमप्रक्रियाभिः सम्बद्धानां समेषां पक्षाणां गुणवत्ताम् अभिवर्धयितुम् अपेक्षितान् व्यूहान् नैरन्तर्येण रचयदस्ति । तत्र हि गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय अनेन केन्द्रेण क्रियमाणाः प्रयासाः यथा –

1. कार्येण सह तत्सम्बद्धगुणवत्तावर्धकमानकानां निर्धारणम् ।

2. शैक्षिकाणां शैक्षिकेतराणां च अधिगमलक्ष्याणां सम्प्राप्तये विद्यमानानां मानदण्डानां निर्धारणम् ।

3. विश्वविद्यालये छात्रकेन्द्रितस्य शैक्षिकवातावरणस्य सर्जनम् ।

4. शिक्षणेन सम्बद्धानां नवाचाराणां अनुप्रयोगाय प्रौद्योगिक्याः आत्मसात्करणाय च शिक्षकाणां प्रचोदनं तेषां सज्जीकरणं च ।

5. सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सर्वोत्तमशिक्षाव्यवस्थायाः संवर्धनदिशि शिक्षकाणां छात्राणाम् अभिभावकानां च अभिप्रायसङ्ग्रहणम्।

6. गुणवत्तापूर्णशैक्षिकवातावरणस्य परिरक्षणाय पूरकाणां कार्यक्रमाणां कार्यशालानां सङ्गोष्ठीनां च आयोजनम्।

7. कालानुगुणं विकासपरकार्याणाम् अभिलेखसङ्ग्रहणम्।

8. राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः मानकानुगुणं विश्वविद्यालयस्य मूल्याङ्कनयोग्यत्वसम्पादनदृष्ट्या सज्जीकरणम् ।

9. आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सम्बद्धानां सर्वविधानाम् अभिलेखानां वार्षिकप्रतिवेदनानां पञ्जिकानां च व्यवस्थिरूपेण सम्पादनम् ।

आन्तरिकगुणवत्ताश्वासनकेन्द्रेण कृतानां कार्याणाम् आमूलचूलं परिशीलनं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः निरीक्षणावसरे जायते। अतः आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्वकर्तव्यानि सर्वदा निर्वहति। तत्कर्तव्यानि यथा –

1. प्रभावपूर्णनेतृत्ववहनम्

2. प्रबन्धने भागग्रहणम्

3. क्रियासाध्यानां योजनानां निर्माणम्

4. वैद्यु तिकप्रशासनव्यवस्थायाः प्रशंसनं प्रोत्साहनं च

5. विभिन्नानां निकायानां विभागानां प्रकोष्ठानां कक्षाणां च प्रभावस्य मापनं तेषां प्रोत्साहनम्

6. आर्थिकसहयोगप्रदानम्

7. व्यावसायिकविकाससम्पादनम्

8. शिक्षणेन सह इतरशैक्षिकक्रियाकलापेषु भागग्रहणाय प्रचोदनम्

9. शैक्षिकलेखाङ्केक्षणस्य प्राशासनिकलेखाङ्केक्षणस्य प्रतिवेदननिर्माणम्

10. विभिन्नप्रत्यायनप्रसङ्गेषु भागग्रहणम्

आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य प्रधानं कार्यम् अस्ति यत् अस्य हितधारकाणां चिन्तनेषु नवाचाराणां समावेशः । वर्तमानकार्यप्रणालीम् अवगमयितुम् आन्तरिकगुणवत्ताश्वासनकेन्द्रं सर्वदा प्रयतते। गुणवत्तापूर्णसंस्कृतेः स्वायत्तीकरणाय अपेक्षितान् व्यूहान् काले काले संरचयति। अस्य सदस्याः सर्वे मुक्तकण्ठेन गुणवत्तासंवर्धनोपायान् मण्डयितुं समर्थाः सन्ति।

आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य परिपूर्णं सहयोगं स्वीकृत्य एव विश्वविद्यालयः प्रतिपदं कार्यं करोति। अतः विश्वविद्यालयस्य स्तरः समेधमानः एव वर्तते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य साहित्यव्याकरणन्यायसर्वदर्शनशिक्षाशास्त्रादिषु विभागेषु अपेक्षितसाहाय्यं कर्तुं केन्द्रमिदं सर्वदा सन्नद्धं भवति। संस्थायाः निर्णयेषु उत्कृष्टतायाः परिरक्षणे अपि अस्य अनितरसाधारणं

योगदानम् अस्ति। अनुसन्धानविभागे अपि अस्य महत्वपूर्णं योगदानं वर्तते। यथा –

1. प्राक्शोधपाठ्यक्रमार्थं प्रशिक्षणसन्दर्भे
2. शोधच्छात्राणां मार्गदर्शनवेलायाम्
3. शोधकर्मणि गुणवत्तासंवर्धनसन्दर्भे
4. पुस्तकालयस्य उद्विकाससन्दर्भे
5. शिक्षकाणां व्यावसायिकाभिक्षमतायाः अभिवर्धनप्रसङ्गे
6. अपेक्षितसंसाधनानां व्यवस्थापनप्रसङ्गे च

आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सर्वेषु विभागेषु विशिष्टाः गुणवत्तापूर्णाः च कार्यक्रमाः आयोज्यन्ते। यथा–

**वृक्षारोपणम्** – वृक्षो रक्षति रक्षितः इति उच्यते। वृक्षैः प्राणवायुरपि प्रचुरमात्रेण लभ्यते। अनेन मानवीयतत्त्वानां समेषां स्वास्थ्यं संवर्धते ।

**कर्गजरहितकार्यम्** – मितव्ययी परिसरः भवेत्। अतः अत्यन्तम् अनिवार्यं चेत्तर्हि कर्गजानां प्रयोगः कर्त्तव्यः इति हितोपदेशाय केन्द्रमिदं सर्वान् प्रचोदयति।

**प्लास्टिक् पदार्थानां रासायनिकौषधानां च उन्मूलनम्** – परिसरस्य परिवेषः प्लास्टिक् – पदार्थैः मुक्तः भवेत्। विश्वविद्यालये रासायनिकपदार्थानाम् उपयोगः अपि यथासम्भवं न स्यात् इति स्थानीयकेन्द्रं चिन्तयति।

**स्वच्छता सुन्दरीकरणं च** – परिसरस्य स्वच्छतापरिरक्षणे सौन्दर्यवर्धने च केन्द्रं सर्वदा मार्गदर्शनं करोति।

**पर्यावरणपरिरक्षणदिवसाचरणम्, स्वच्छभारताभियानम्** – विश्वविद्यालये पर्यावरणपरिरक्षणदिवसाचरणावसरे स्वच्छभारताभियाने च केन्द्रमिदं प्रचोदककार्यं करोति।

एवं विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्थानीयस्तरानुरूपं चिन्तनं करोति वैश्विकस्तरानुरूपं कार्यं करोति।